# || श्रीशिवरक्षास्तोत्र ||

श्रीशिवरक्षास्तोत्रस्य याज्ञवल्क्य ऋषिः , श्री सदाशिव: देवता ॥ अनुष्टुप् छन्दः ॥

श्री सदाशिव प्रसन्नार्थे आत्मरक्षणार्थे च शिवरक्षास्तोत्र पाठे विनियोगः ॥

( भगवान शिव का ध्यान कर यह रक्षा स्तोत्र पढ़ें ! )

गंगाधरः शिरः पातु भालं अर्धेन्दुशेखरः ।
नयने मदनध्वंसी कर्णो सर्पविभूषण: ॥ 3॥

घ्राणं पातु पुरारातिः मुखं पातु जगत्पतिः ।
जिह्वां वागीश्वरः पातु कंधरां शितिकंधरः ॥ 4॥

श्रीकण्ठः पातु मे कण्ठं स्कन्धौ विश्वधुरन्धरः ।
भुजौ भूभारसंहर्ता करौ पातु पिनाकधृक् ॥ 5॥

हृदयं शंकरः पातु जठरं गिरिजापतिः ।
नाभिं मृत्युञ्जयः पातु कटी व्याघ्राजिनाम्बरः ॥ 6॥

सक्थिनी पातु दीनार्त शरणागतवत्सलः ॥

उरू महेश्वरः पातु जानुनी जगदीश्वरः ॥ 7॥

जङ्घे पातु जगत्कर्ता गुल्फौ पातु गणाधिपः ॥

चरणौ करुणासिंधुः सर्वाङ्गानि सदाशिवः ॥ 8॥

फलश्रुति :

एतां शिवबलोपेतां रक्षां यः सुकृती पठेत् ।
स भुक्त्वा सकलान्कामान् शिवसायुज्यमाप्नुयात् ॥ 9॥

ग्रहभूतपिशाचाद्यास्त्रैलोक्ये विचरन्ति ये ।
दूरादाशु पलायन्ते शिवनामाभिरक्षणात् ॥ 10 ॥

अभयङ्करनामेदं कवचं पार्वतीपतेः ।
भक्त्या बिभर्ति यः कण्ठे तस्य वश्यं जगत्त्रयम् ॥ 11॥

इमां नारायणः स्वप्ने शिवरक्षां यथाऽऽदिशत् ।
प्रातरुत्थाय योगीन्द्रो याज्ञवल्क्यः तथाऽलिखत् ॥ 12॥

इति श्रीयाज्ञवल्क्यप्रोक्तं शिवरक्षास्तोत्रं सम्पूर्णम् ॥

- स्वामी रुपेश्वरानंद

https://swamirupeshwaranand.in/